श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ एकोनविंशत्यधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनविंशत्यधिकशततमः सर्गः ॥

## अनसूयादेशेन सीतायास्तत्प्रदत्तानां दिव्यवस्त्राभूषणानां धारणं कृत्वा श्रीरामस्य पार्श्वे गमनं श्रीरामादीनां रात्रावाश्रमे स्थित्वा प्रातरन्यत्र गन्तुमृषिभ्योऽनुज्ञाया ग्रहणम्

अनसूया तु धर्मज्ञा श्रुत्वा तां महतीं कथाम्।
पर्यष्वजत बाहुभ्यां शिरस्याघ्राय मैथिलीम्॥ **2.119.1** ॥

व्यक्ताक्षरपदं चित्रं भाषितं मधुरं त्वया।
यथा स्वयंवरं वृत्तं तत् सर्वं च श्रुतं मया॥ **2.119.2** ॥

रमेयं कथया ते तु दृढं मधुरभाषिणि।
रविरस्तं गतः श्रीमानुपोह्य रजनी शुभाम्॥ **2.119.3** ॥

दिवसं परिकीर्णानामाहारार्थं पतत्रिणाम्।
सन्ध्याकाले निलीनानां निद्रार्थं श्रूयते ध्वनिः॥ **2.119.4** ॥

एते चाप्यभिषेकार्द्रा मुनयः कलशोद्यताः।
सहिता उपवर्तन्ते सलिलाप्लुतवल्कलाः॥ **2.119.5** ॥

अग्निहोत्रे च ऋषिणा हुते च विधिपूर्वकम्।
कपोताङ्गारुणो धूमो दृश्यते पवनोद्धतः॥ **2.119.6** ॥

अल्पवर्णा हि तरवो घनीभूताः समन्ततः।
विप्रकृष्टेन्द्रिये देशे न प्रकाशन्ति वै दिशः॥ **2.119.7** ॥

रजनीचरसत्त्वानि प्रचरन्ति समन्ततः।
तपोवनमृगा ह्येते वेदितीर्थेषु शेरते॥ **2.119.8** ॥

सम्प्रवृत्ता निशा सीते नक्षत्रसमलङ्कृता।
ज्योत्स्नाप्रावरणश्चन्द्रो दृश्यतेऽभ्युदितोऽम्बरे॥ **2.119.9** ॥

गम्यतामनुजानामि रामस्यानुचरी भव।
कथयन्त्या हि मधुरं त्वयाहमपि तोषिता॥ **2.119.10** ॥

अलङ्कुरु च तावत् त्वं प्रत्यक्षं मम मैथिलि।
प्रीतिं जनय मे वत्से दिव्यालङ्कारशोभिनी॥ **2.119.11** ॥

सा तदा समलङ्कृत्य सीता सुरसुतोपमा।
प्रणम्य शिरसा पादौ रामं त्वभिमुखी ययौ॥ **2.119.12** ॥

तथा तु भूषितां सीतां ददर्श वदतां वरः।
राघवः प्रीतिदानेन तपस्विन्या जहर्ष च॥ **2.119.13** ॥

न्यवेदयत् ततः सर्वं सीता रामाय मैथिली।
प्रीतिदानं तपस्विन्या वसनाभरणस्रजाम्॥ **2.119.14** ॥

प्रहृष्टस्त्वभवद् रामो लक्ष्मणश्च महारथः।
मैथिल्याः सत्क्रियां दृष्ट्वा मानुषेषु सुदुर्लभाम्॥ **2.119.15** ॥

ततः स शर्वरीं प्रीतः पुण्यां शशिनिभाननाम्।
अर्चितस्तापसैः सर्वैरुवास रघुनन्दनः॥ **2.119.16** ॥

तस्यां रात्र्यां व्यतीतायामभिषिच्य हुताग्निकान्।
आपृच्छेतां नरव्याघ्रौ तापसान् वनगोचरान्॥ **2.119.17** ॥

तावूचुस्ते वनचरास्तापसा धर्मचारिणः।
वनस्य तस्य सञ्चारं राक्षसैः समभिप्लुतम्॥ **2.119.18** ॥

रक्षांसि पुरुषादानि नानारूपाणि राघव।
वसन्त्यस्मिन् महारण्ये व्यालाश्च रुधिराशनाः ॥ **2.119.19** ॥

उच्छिष्टं वा प्रमत्तं वा तापसं ब्रह्मचारिणम्।
अदन्त्यस्मिन् महारण्ये तान् निवारय राघव ॥ **2.119.20** ॥

एष पन्था महर्षीणां फलान्याहरतां वने।
अनेन तु वनं दुर्गं गन्तुं राघव ते क्षमम् ॥ **2.119.21** ॥

इतीरितः प्राञ्जलिभिस्तपस्विभि -
　　र्द्विजैः कृतस्वस्त्ययनः परन्तपः।
वनं सभार्यः प्रविवेश राघवः
　　सलक्ष्मणः सूर्य इवाभ्रमण्डलम् ॥ **2.119.22** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे एकोनविंशत्यधिकशततमः सर्गः ॥